नवत्रिंशत्तमः पाठः - https://www.youtube.com/watch?v=Cm0B_yBFOf4

१६२. विशिष्टक्रियापदानां पुनश्चरणम् (मिश्रिताभ्यास-रूपेण)
एकवचने वाक्यम् अस्ति चेत् बहुवचन-रूपं, तथैव बहुवचने वाक्यम् अस्ति चेत् एकवचन-रूपं भवन्तः ध्वनिमुद्रण-रूपेण (by recording) वदन्तु –
यथा सः संस्कृतं पठति। - ते संस्कृतं पठन्ति।

क) बालः ग्रामं गच्छति। - ?
ख) छात्राः रघुवंशं पठन्ति। - ?
ग) मन्त्रिणः सम्यक् कार्यं कुर्वन्ति। - ?
घ) विद्यार्थिनः धनं गृह्णन्ति। - विद्यार्थी ...?
च) महाजनः भाषणं करोति। - ?
छ) बाला प्रातः उत्तिष्ठति। - ?
ज) नदी वेगेन प्रवहति। - ?
झ) पण्डिताः शास्त्रं जानन्ति। - ?
ट) भवान् बहु समयं स्वीकरोति। - ?
ठ) बुद्धिमान् प्रवचनं ददाति। - बुद्धिमन्तः ...?
ड) महिलाः एवमेव रुदन्ति! - ?
ढ) सर्वे सम्यक् उपविशन्ति। - सर्वः ...?
प) जनाः प्रवचनं शृण्वन्ति। - ?
फ) पुष्पाणि विकसन्ति। - ?
ब) नारी विमानचालनम् अपि शक्नोति। - ?
भ) सा सदा दूरदर्शनं पश्यति।- ?

१६३. श्लोकः
वने चरामो वसु चाहरामः नदीस्तरामो न भयं स्मरामः।
इतीरयन्तोऽपि वने किराताः मुक्तिं गता राम-पदानुषङ्गात्।

वने च**रामः**=चलामः। वसु च आह**रामः**=सम्पादयामः।
नदीः त**रामः** దాటుతాము we cross। न भयं स्म**रामः**।

इति ईरयन्तः=वदन्तः ('वदन्' इत्यस्य बहुवचनम्) अपि
वने किराताः **राम-**पदानुषङ्गात् मुक्तिं गताः।
(अनुषङ्गः=समीपत्वम् nearness)

१६४. क्तान्त-प्रयोगाणां पुनश्चरणम् - वाक्यद्वयस्य योजनेन
भवन्तः योजयित्वा वदन्तु ध्वनिमुद्रणेन।
यथा सः विद्यालयं गच्छति, पाठं पठति। - सः विद्यालयं गत्वा पाठं पठति।

क) बालिका फलं खादति, जलं न पिबति। - ?
ख) अहं श्लोकं पठामि, अर्थं न जानामि। - ?
ग) भवन्तः गीतं शृण्वन्ति, चायं पिबन्ति। - ?
घ) पितामहः रामायणं पाठयति, अर्थं वदति। - ?
च) छात्रः चिन्तयति, उत्तरं लिखति। - ?
छ) माता पुत्रं ताडयति, दुःखम् अनुभवति। - ?
ज) सा पुस्तकं पठितवती, भोजनं कृतवती। - ?
झ) ते चित्रं दृष्टवन्तः, आनन्दम् अनुभूतवन्तः। - ?
ट) वयं संस्कृतं ज्ञातवन्तः, रामायणं पठामः। - ?
ठ) बालाः क्षीरं पीतवन्तः, क्रीडार्थं गतवन्तः। - ?

१६५. विशिष्टानि क्त्वान्त-रूपाणि (क्त्वान्तम्=अन्ते क्त्वा-प्रत्ययः अस्ति इति क्त्वान्तम्)
वदति – उदित्वा (अत्र 'वद' इति धातुः)
वक्ति - उक्त्वा (अत्र 'वच' इति धातुः) समाने अर्थे in the same meaning

ददाति – दत्त्वा (अत्र तकारद्वित्वं लेखनीयम्!)
पचति - पक्त्वा
नृत्यति – नर्तित्वा

१६६. क्त्वान्त-पदस्य द्विवारं प्रयोगः
अहं कार्यं कृत्वा, कृत्वा श्रान्तः जातः।
सः चलच्चित्रं/चलनचित्रं/चलचित्रं दृष्ट्वा दृष्ट्वा शिरोवेदनां प्राप्तवान्।
शिशवः पदानि श्रुत्वा, श्रुत्वा स्वयं प्रयोगं कुर्वन्ति।

## सुभाषितम्

३९. विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय॥

पदविभागः – विद्या, विवादाय, धनम्, मदाय, शक्तिः, परेषाम्, परि-पीडनाय।
खलस्य, साधोः, विपरीतम्, एतत्, ज्ञानाय, दानाय, च, रक्षणाय॥

अन्वयः अर्थः च – खलस्य विद्या
विवादाय=विवादार्थम्/विवादस्य+कृते for quarrel (भवति)।
(तस्य) धनं मदाय=for ego (भवति)।
(तस्य) शक्तिः परेषां+परि-पीडनाय for troubling others (भवति)।

(परन्तु) साधोः=साधु-जनस्य विपरीतम् opposite एतत्।

(साधोः विद्या स्वस्य, परेषां च) ज्ञानाय।
(तस्य धनं परेभ्यः for others) दानाय।
(तस्य शक्तिः परेषां of others) रक्षणाय च।

**कथा** (कथायां क्त्वान्त-रूपाणि, ल्यबन्त-रूपाणि च स्थूलाक्षरैः सन्ति)
पूर्वं कस्मिंश्चित् अरण्ये केचित् चोराः आसन्। ते एकस्मिन् कुटीरे निवासं कुर्वन्ति स्म। लुण्ठनं, घर्षणं, हननम् इत्यादीनि बहूनि पापकार्याणि कुर्वन्ति स्म। तेन मार्गेण यः कोऽपि गच्छति, तम् **आनीय मारयित्वा** धनं सङ्गृह्णन्ति स्म।

कदाचित् महाराजः एतां वार्तां ज्ञातवान्। सः भटान् प्रेषितवान्। बहवः भटाः आगतवन्तः। ते चोराणां निग्रहणं capture कृतवन्तः। तान् राजधानीं **नीत्वा** कारागारे in the jail स्थापितवन्तः।

कदाचित् कश्चन साधुः तत् अरण्यम् आगतवान्। सः कुटीरं दृष्टवान्। कुटीरः रिक्तः आसीत्। तत्र एव वासं कृतवान्। ध्यानम् अपि तत्र एव। एवं कानिचित् दिनानि अतीतानि।

वर्षाकालः आसीत्। एकस्मिन् दिने तेन मार्गेण कश्चित् युवकः पत्न्या सह आगतवान्। तदा वृष्टिः/वर्षम् अपि आसीत्। सः वृष्टितः रक्षणं प्राप्तुं तं कुटीरम् आगतवान्। तौ

कुटीरं प्रविष्टवन्तौ। साधुः तपः करोति स्म। सः नेत्रे **उन्मील्य** दृष्टवान्। किञ्चित्-कालानन्तरं साधोः मनसि कश्चन विकारः उत्पन्नः। सः चिन्तितवान् यत् कथम् अपि एषा युवकस्य पत्नी मया वशीकर्तव्या इति। कालान्तरे वृष्टिः शान्ता अभवत्। युवकः पत्न्या सह ततः प्रस्थितवान्। यदा तौ आश्रमतः दश वा पञ्चदश वा पदानि अग्रे गतवन्तौ, तदा साधुः कुटीरे एव **स्थित्वा** आक्रोशं कृतवान्। 'तिष्ठताम्! नोचेत् अहं वधं करिष्यामि' इति सः **उक्त्वा**, छुरिकां **गृहीत्वा**, **धावित्वा**, तयोः समीपम् आगतवान्।

युवकस्य महत् आश्चर्यम् अभवत्। एषः साधु-वेष-धारी कश्चित् चोरः स्यात् इति सः चिन्तितवान्। किन्तु तावता साधोः मनःपरिवर्तनं जातम्। सः 'अहं किमर्थम् एवं व्यवहारं कृतवान्?' इति न ज्ञातवान्। युवकस्य क्षमाप्रार्थनां **कृत्वा**, 'गच्छताम्!' इति **उक्त्वा** साधुः कुटीरं प्रतिनिवृत्तः returned।

युवकः भार्यया सह अग्रे गतवान्। किन्तु यदा साधुः पुनः कुटीरं प्रविष्टवान्, पुनरपि तस्य मनःपरिवर्तनम् अभवत्। सः 'कुत्र गच्छतः? तत्र एव तिष्ठताम्! अहं भवतोः मारणं करिष्यामि' इति वदन्, पुनरपि तत्र धावितवान्। इदानीं युवकस्य, युवत्याः च महत् आश्चर्यं पुनः। किं करणीयम् इति **अ-ज्ञात्वा**, तौ तत्र एव स्थितवन्तौ।

यदा साधुः तयोः समीपं गतवान्, तस्य मनः पुनः स्वच्छम् अभवत्। सः 'किमर्थम् एवं मम मनःपरिवर्तनं भवति?' इति युवकम् एव पृष्टवान्।

वस्तुतः युवकः समीप-ग्रामे एव निवसति स्म। सः तस्य कुटीरस्य इतिहासं जानाति स्म। सः युवकः उक्तवान् - 'साधो! एतस्य कारणम् अहं जानामि! भवान् यस्मिन् कुटीरे निवसति, तस्मिन्/तत्र पूर्वं चोराः आसन्। ते लुण्ठाकाः एव। ते सर्वदा अपि पापकार्याणि कुर्वन्ति स्म। अतः तेषां दुष्ट-चिन्तनं कुटीरे इदानीम् अपि अस्ति। अतः यदा भवान् कुटीरस्य अन्तः तिष्ठति, तदा भवतः मनः अपि कलुषितं भवति।' इति।

युवकस्य वचनं **श्रुत्वा** साधुः तत् एव कारणम् इति ज्ञातवान्। अनुक्षणं सः तं कुटीरं **परित्यज्य** तपः कर्तुम् अन्यत्र गतवान्।

**कथायाम् एतान् प्रयोगान् पश्यत=भवन्तः+पश्यन्तु! *New**

कस्मिंश्चित् अरण्ये ఒకానొక అడవిలో in some forest (कस्मिन्_**चित्**=कस्मिंश्चित्)

के**चित्** चोराः కొంతమంది దొంగలు some thieves

कदा**चित्** ఎప్పుడో ఒకప్పుడు sometime

कश्चन साधुः ఒకానొక సాధువు some good-man (कः_**चन**=कश्चन)

कानि**चित्** दिनानि కొన్ని రోజులు some days

कश्चित् युवकः ఒకానొక వయసుకాడు some young-man (कः_**चित्**=कश्चित्)

कश्चन विकारः ఏదో ఒక వికారం some change

कश्चित् चोरः ఎవడో ఒక దొంగ some thief

अवधातव्यम् అవధానింపబడవలెను Be noted यत्

-चन, -चित् इति एतयोः अर्थः समानः।

**इदानीं एतान् पदगुच्छान् परिशीलयत!** (Symbol '_' means सन्धिः करणीयः इति)

कश्चन चोरः ఒకానొక దొంగ some thief (subject-form)

कञ्चन=कं_चन चोरम् ఒకానొక దొంగ ని/కు/కూర్చి/గురించి some thief (object-form)

केनचित् चोरेण ఒకానొక దొంగ చేత/తో by/with some thief

कस्मैचन चोराय ఒకానొక దొంగ కొరకు/కై/కి for some thief

कस्माच्चन=कस्मात्_चन चोरात् ఒకానొక దొంగ నుంచి/వలన/కంటె/పట్టి

from/than some thief

कस्यचन चोरस्य ఒకానొక దొంగ కి/యొక్క of some thief

कस्मिंश्चन=कस्मिन्_चन चोरे ఒకానొక దొంగ యందు/పైన/లోపల in/on some thief

**Exercise** Write/speak the following expressions in Samskritam –

1. దొంగ అబద్ధం చెప్పి తప్పించుకున్నాడు (విముక్తిని పొందాడు). After telling lies (having lied), thief escaped (got freedom).

2. అమ్మ అన్నం వండి, బజారుకు పోయింది. (బజారు=विपणिः) After cooking food, mother went to the market.

3. ఆమె డాన్సు చేసి చేసి, చాలా డబ్బు సంపాదించింది. After dancing and dancing (by dancing again and again), she earned a lot of money.

4. సజ్జనుడు ఇచ్చి ఆనందిస్తాడు (ఆనందం పొందుతాడు), దరిద్రుడు దాన్ని తీసుకొని ఆనందిస్తాడు. Good man enjoys after giving, poor man enjoys after receiving it.

5. వాడు పని చేసి చేసి కూడా అలసిపోలేదు (అలసినవాడు=శ్రాంతుడు కాలేదు). He is not tired even after working and working (working a lot).

6. పసివాడు ఏడ్చి ఏడ్చి తిండి తినకుండానే, నిద్ర పోయాడు. After crying and crying (crying again and again), infant slept without eating food.

(అవసరమైతే SNet 14పేజీల పుస్తకంలో 5వ పేజీని చూడండి. మీరు ఒకసారి ఆ 14 పేజీలూ తిరగెయ్యండి. అందులో ఉన్న విషయాలని శ్రద్ధగా పరిశీలించండి. If needed, please look up Page #5 of SNet's 14-page-booklet. Study the matter there carefully.)

7. ఆ బాలిక టీవీని (దూరదర్శనాన్ని) చూసి, చూసి రెండు కళ్ళు పాడు (నాశనం) చేసుకొంది. Having seen and seen TV (having seen a lot of TV), that girl spoiled both her eyes.

8. మానవుడు పొద్దున్నే లేచి శ్రద్ధతో చదువుకోవాలి (पठेत् इति एकवचने). After getting up early in the morning, man should study with care.